५-८-२६

२३६६

No. क

Title दुर्गादेवीविधानम्

Author

Extent ६ पत्र Age

Subject तंत्र

दुर्गादेवीविधान

नं॰ १३६६

नं० ९२ [illegible]
दुर्गा देवी विद्यालय
[illegible]

[illegible]

नं० ~~२२५८~~ २८८

5826/6

श्री० १

ॐ श्रीगणेशायनमः अधुनाश्रृणुविप्रेंद्रदुर्गादेव्याविधान
के यस्याःस्मरणमात्रेणपलायंतेमहापदः १ यतोनभज
तोहिताहकुनास्येवकुत्रचित् सर्वोपास्यासर्वमातानाशे
ीशक्तिर्महाद्भुता २ सर्वबुद्ध्यधिदेवीयमंतर्यामिस्वरू
पिणी दुर्गसंकटहंत्रीतिदुर्गेतिप्रथितानाभुवि ३ वैष्णवा
नांचशैवानामुपास्येयंचनित्यशः मूलप्रकृतिरूपासा
सृष्टिविधानकारिणी ४ तस्यानवाक्षरंमंत्रंवक्ष्येमंत्रो

नमोनमं वाग्भवंशंभुवनिताकामबीजंनतःपरं ५ चामुंडायैप
दंपश्चाद्विच्चेइत्यक्षरद्वयं नवाक्षरोमन्त्रःप्रोक्तोभजनोकल्पपा
दपः ६ ब्रह्मविष्णुमहेशानाऋषयोस्यप्रकीर्तिताः छंदांस्यु
क्तानिमुनिगायत्र्युष्णिगनुष्टुभः ७ महाकालीमहालक्ष्मीः
सरस्वत्यधिदेवता रक्तदन्तिकाबीजंदुर्गाचभ्रामरीतथा ८
नंदाशाकंभरीदेवीभीमाचशक्तयःस्मृताः धर्मार्थकामामो
क्षेषुविनियोगउदाहृतः ९ ऋषिछंदोदेवतानांनिमोलोबक्षेर

श्री
२

दिग्बंधेत् स्तनयोः शक्तिबीजानिन्यसेत्सर्वार्थसिद्धये १० बीजत्रयैः
स्व[illegible]ष्वहृदाभ्यां समस्तैश्चैव हि षडंगानि मनोः कुर्याज्ज्ञानियुक्ता
नि[illegible]कः ११ शिखायां लोचनद्वंद्वे श्रुतिनासाननेषु च गुदे न्य
सेन्मंत्रवर्णान्सर्वैर्व्यापकं चरेत् १२ खड्गचक्रगदाबाणचापा
नि[illegible]नयना मूलं भुशुंडीं च शिरः शंखं संदधतीं करैः १३ महा
कालीत्रि[illegible]नानाभूषणभूषितां नीलांजनसमप्रख्यां दश
पा[illegible] १४ मधुकैटभनाशार्थं यां तुष्टावांबुजासनः प

वंध्यायेन्महाकालींकामबीजस्वरूपिणीं १५ अक्षमालांच
परशुंगदेषुकुलिशानिच पद्मंधनुकुंडिकांचदंडंशक्तिम
सिंतथा १६ चर्मांबुजंतथाघंटांसुरापात्रंचशूलकं पाशं
सुदर्शनंचैववदधतीमरुणप्रभां १७ रक्तांबुजासनगतांमा
याबीजस्वरूपिणीं महालक्ष्मींभजेदेवंमहिषासुरमर्दि
नीं १८ घंटाशूलेहलंशंखंमुसलंचसुदर्शनं धनुर्बाणान्
हस्तपद्मैर्दधानांकुंदसन्निभां १९ शुंभादिदैत्यसंहर्त्रीवाणी

श्री०
३

बीजरूपिणीं महासरस्वतीं ध्यायेत्सच्चिदानंदविग्रहां २० यं
नमः प्राणाद्यास्तंबद्धोणसंयुतं ततोष्टदलपद्मं च चतु
र्विंशतिपत्रकं २१ स्वर्णहेमसमायुक्तं यंत्रमेवं विचिंतयेत्
शालग्रामे घटे वापि यंत्रे वा प्रतिमासु वा २२ बाणलिंगेथवा
सूर्ये ध्यात्वा देवीमनन्यधीः जयादिशक्तिसंयुक्ते पीठे देवीं प्रपू
जयेत् २३ पूर्वकोणे सरस्वत्या सहितं पद्मजं यजेत् श्रिया सह
हरिं तत्र नैर्ऋते कोणके यजेत् २४ पार्वत्या सः हितं शंभुं वा

ग्नकोणेसमर्चयेत् देव्याउत्तरतःपूज्यःसिंहोवामेमहासुरं
२५ महिषंपूजयेदंतेषट्कोणेषुयजेत्क्रमात् नंदजांरक्तदं
तांचतथाशाकंभरींशिवां २६ दुर्गांभीमांभ्रामरींचतनोष्ट
सुदलेषुच ब्राह्मींमाहेश्वरींचैवकौमारींवैष्णवींतथा २७
वाराहींनारसिंहींचऐंद्रींचामुंडकांतथा पूजयेत्तुततःपश्चा
त्तत्पत्रेषुपूर्ववत् २८ विष्णुमायाचेतनाचबुद्धिर्निद्रातथा
तथा छायाशक्तिःपरात्पमात्रांतिर्जातिश्चलज्जया २९

श्री
५

शांतिःश्रद्धाकीर्त्तिर्लक्ष्मीर्धृतिर्ह्रीर्नतिःस्तुतिःस्मृतिः दयातुष्टिस्त
तःपुष्टिर्मातश्शांतिरितिक्रमात् ३० ततोभूपुरकोणेषुगणेशं
क्षेत्रपालकं वटुकंयोगिनीश्चापिपूजयेन्मतिमान्नरः ३१ इंद्रा
द्यानपितथालोकेवज्राद्यायुधसंयुतान् पूजयेदनयारीत्यादेवी
सावरणांततः ३२ राजोपचारान्विविधान्दद्याद्देवाप्रतुष्टये
ततोजपेन्मनुवाणींचमंत्रंमंत्रार्थपूर्वकं ३३ ततःसप्तशतीस्तो
त्रंदेव्याश्चाग्रेतुसंपठेत् नानेनसदृशंस्तोत्रंविद्यतेभुवनत्रये ३४

ननस्थानेनदेवेशीनोभयेत्स्वप्नमहंनरः धर्मार्थकाममोक्षाणामा
लयंजायतेनरः ३५ इतितेकथितंविप्रश्रीदुर्गायाविधानकं
कृतार्थतायेनभवेत्तदेतत्कथितंतव ३६ सर्वेदेवाहरिब्रह्मप्र
मुखावामनवस्तथा मुनयोज्ञाननिष्ठाश्चयोगिनश्चाश्रमास्तथा
३७ लक्ष्म्यादयस्तथादेव्यःसर्वेध्यायंतितांशिवां नदैवजन्मसा
फल्यंदुर्गास्मरणमस्तिचेत् ३८ चतुर्दशापिमनवः ध्यात्वाचर
णपंकजं मनुत्वंप्राप्नवंतश्चदेवाःस्वंस्वंपदंतथा ३९ नदेवास्त

स्त्री· वैमाख्यातं रहस्यातिरहस्यकं प्रकृतीनां पंचकस्य तद्ध्यानां चव
५ र्णितं ४० स्तवैतन्मनुजो नित्यं पुरुषार्थं चतुष्टयं लभते नात्र
5 संदेहः सत्यं सत्यं मयोदितं ४१ पुत्रार्थी लभते पुत्रं विद्यार्थी प्रा
प्नुयाद्वतां येयंकामं स्मरेद्वापि तं तं स्तुत्वा समाप्नुयात् ४२ न
वरात्रे पठेदेतद्देव्यग्रेतु समाहितः परितुष्टा जगद्धात्री भवत्ये
वहि निश्चितं ४३ नित्यमेकैकमध्यायं पठेद्यः प्रत्यहं नरः न
स्य वश्या भवेद्देवी देवी प्रियकरो हि सः ४४ शाक्तनांस्तुपरीदे

तन्नित्यमस्मिन्यथाविधि कुमारीदिव्यहस्तेनेयद्वावद्गुरुकां
भुजान् ४५ मनोरथंतु संकल्प्य पुस्तकं पूजयेत्ततः देवीं च
जगदीशानीं प्रणमेच्च पुनः पुनः ४६ सुस्नातां कन्यकां तु
आनीयाभ्यर्च्य यथाविधि शलाकां रोपयेन्मध्ये तया स्वर्णेन
निर्मितां ४७ शुभं वाप्यशुभं तत्र यदायाति च तत्क्षणेन् उदा
सीनेप्युदासीनं कार्यं भवति निश्चितं ४८ ॥